





ISBN – 978-93-5235-767-3

<u>प्रकाशन समिति</u>

डो. हरेश पी. दवे

डो. पंकज एम. सोंदरवा

डो. संजय एल. बंधिया

डो. भावना के. ठुम्मर

प्रा. महेश एम. वाघेला

प्रति – ५००

मूल्य – १००

मुद्रक

वेदांग ओफसेट,जूनागढ

# स्वामिविवेकानन्दस्य शिक्षाविषयकविचाराः

**जानकीशरणः**
सहायकाचार्यः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम्, गिर-सोमनाथः-362266

ISBN 978-93-5235-767-3

**प्रास्ताविकम् –**

शिक्षा खलु व्यक्तित्वविकासाय अन्यतमं साधनं तु वर्तत एव किन्तु आस्तिकदर्शनानुयिभ्यः पुरुषार्थचतुष्टयस्य साधनमपि वरीवर्ति। एतया विना मानवजीवनं शुनः पुच्छमिव व्यर्थं भवति। वैदिकसाहित्ये शिक्षाशब्दस्य प्रयोगः विद्या, ज्ञानं, बोधः, विनयः इत्यादिषु विविधेष्वर्थेषु कृतः। लोकेऽस्मिन् शिक्षा ज्ञानज्योतिं प्रकाशयति, अविद्यान्धतमसं व्यपोहति, दुर्गुणग्रामं वारयति, सद्गुणगणं सञ्चारयति, कीर्तिं प्रथयति, गौरवं वर्धयति, यशं प्रसारयति, भूभृत्सु च आदरम् आवहति। "या विद्या सा विमुक्तये[1]" इति उपनिषत्समयः। "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते[2]" इति खलु वेदनादः। एवं सा विद्या एव प्रकृष्टा या मुक्तिं प्रददाति। वेद-शास्त्र-आर्षग्रन्थ-विज्ञानादीनां साध्वनुशीलनेन तत्त्वार्थज्ञानं च विद्यया भवतीति आर्षमनीषा। उपनिषदनुसारं द्वे विद्ये वर्तेते – परा अपरा च। यया विद्यया लौकिकं ज्ञानं जायते सा अपरा विद्या, यया च अक्षरब्रह्मविषयकं ज्ञानं जायते सा परा विद्या अर्थात् मुक्तिफलप्रदा। एषा विद्या मातृवत् संरक्षिका, पितृवत् सन्मार्गप्रदर्शिका, कान्तावत् सुखदा मनोरञ्जिका च, कीर्तिप्रदा, वैभवदायिनी, दुर्गुणगणनाशेन मनसः पावयित्री च। इयं विद्या सर्वमनोरथपूरणात् कल्पलतेति विज्ञायते।

**शिक्षायाः शाब्दिकार्थः –**

शिक्षा शब्दस्य निष्पत्तिः "शिक्षा विद्योपादाने" इत्यस्माद्धातोः भवति, यस्य च अर्थः भवति शिक्षणम् अध्ययनम् वा। अथवा "शिक्ष्यते भाष्यते अनया इति शिक्षा" अर्थात् यया वर्णादीनामुच्चारणज्ञानं भवति सा शिक्षा। एवमेव "विद्या" इति शब्दः "विदलृ उपादाने" इति धातोः निष्पन्नोऽस्ति। अयमपि शब्दः पूर्वोक्तार्थमेवाभिप्रैति। प्राचीनकाले शिक्षाशब्दस्य प्रयोगः "अनुशासनम्" इत्यर्थेऽपि कृतो वर्तते।[3] वस्तुतः शिक्षायाः अपरं प्रसिद्धं नाम अनुशासनमेव अस्ति।

[1] विष्णुपुराणम्, १.१९.४१
[2] ईशोपनिषत्, ११
[3] "एतदनुशासनम्" – तैत्तिरीयोपनिषत् १.११.४





**स्वामिविवेकानन्दस्य शैक्षिकदर्शनम्–**

भारतदेशे दार्शनिकचिन्तनस्य एका अजस्रधारा प्राचीनकालाद् अद्यावधिपर्यन्तं प्रवहन्ती दृश्यते। भगवतः शङ्कराचार्यस्य अवतरणानन्तरं वेदान्तशाखानां विस्तृतविवेचनम् आरब्धम्। ततः आरभ्य एकोनविंशतिशताब्दिपर्यन्तमागतस्य वेदान्तस्य अजस्रवाहिनी धारा विभिन्नधारासु विभक्ता। कालखण्डेऽस्मिन् बहवो हि भारतीयमनीषिणः भारतीयदर्शनानामाधारेण स्वकीयान् शैक्षिकविचारान् प्राकटयन्। तेषु स्वामिविवेकानन्दस्य शिक्षाविषयकविचाराः साम्प्रते अतीवोपादेयाः सन्ति।

स्वामिविवेकानन्दस्य अवतरणं भारतस्य सनातनधर्मस्य चेतिहासे सामान्यघटना नास्ति, अतस्तस्य परिचयकरणं नावश्यकम्। महापुरुषाणां वियति स्वामिविवेकानन्दः देदीप्यते इति निश्चप्रचम्। हिन्दुधर्मस्य पुनरुज्जागरणविषये स्वामिविवेकानन्दात् प्रागपि बहवो हि मनीषिणः प्रयत्नीमकार्षुः। तथापि हिन्दुधर्मविषये या नवचेतना स्वामिविवेकानन्दस्य समये दृग्गोचरा भवति, तथा तेषां मनीषिणां समये तत्र न दृश्यते स्म। तत्र किं कारणमिति विचारे सति एवमवगम्यते यत् स्वामिविवेकानन्देन हिन्दुधर्मे नवचेतनायाः यः सञ्चारस्कृतः, यच्च पुनरुज्जागरणं कृतम्, तस्य कारणभूता आसीत् – तेषां समन्वयदृष्टिः। स्वामिविवेकानन्दः स्वानुभूतस्य ज्ञानस्य शिक्षां सहजतयैव प्रदत्तवान्। स्वामिपादेन वेदान्तस्य व्यावहारिकं स्वरूपं स्वीकृतम्। स्वामिपादाः मानवसेवामेव ईश्वसेवां मन्वते स्म। तेषां मतानुसारं स एव शान्तिमधिगच्छति यस्तु अनेकताष्वप्येकतां पश्यति, वैविध्येऽपि ऐक्यसाक्षात्कारं करोति। तन्मते आत्मा एव मनसा शरीरे कार्यं विदधाति। स्वामिविवेकानन्दः सर्वान् धर्मान् प्रति समादरस्य सत्वेऽपि वेदान्तशास्त्रस्याद्वैतमतमेव सार्वभौमिकं विज्ञानधर्मरूपेण मनुते स्म। अतः स्वामिपादेन वेदान्तदर्शनस्य पुनर्व्याख्यानम् आधुनिकदृष्ट्या कृतम्। तेन निराशावकुण्ठने विद्यमानभारतीयजनतायाः कृते नूतनमार्गः प्रदर्शितः। अतः स्वामिपादाः शिक्षायाः उद्देश्यानां विषये वदन्ति – "या शिक्षा प्रणाली जनसामान्यस्य जीवनसङ्घर्षणेन साकं योद्धुं क्षमताप्रदाने सहायिका न भवति, या मनुष्यस्य नैतिकबलस्य एवं सेवाधर्मस्य, मनुष्ये सिंहसदृशसाहसस्य विकासं न करोति, सा शिक्षा योग्या भवति किम्?" अन्यत्राप्युक्तं स्वामिपादेन यत् "एषा उच्चशिक्षा भवतु न भवतु वा, अनया का हानिर्भवति? एतदधिकं समीचीनं भवति, यदि

जनेभ्यः किञ्चित् साङ्केतिकशिक्षा मिलति, यया जनाः उपाध्यर्थं इतस्ततः भ्रमणापेक्षया यस्मिन् कस्मिन्नपि कर्मणि लग्नाः भूत्वा जीविकोपार्जनं कर्तुं शक्नुयुः।[4]"

**स्वामिविवेकानन्दस्य शिक्षायाः परिभाषा–**

स्वामी विवेकानन्दानुसारं शिक्षायाः व्याख्या शक्तेः विकासरूपेण कर्तुं शक्यते। शिक्षया मानवस्य अन्तर्निहितशक्तीनां पूर्णतया विकासो भवति। वेदान्तमतानुसारं प्रत्येकस्मिन् बालके अनन्तज्ञानं, अनन्तसामर्थ्यम् एवम् अनन्तव्यापकत्वम् इत्याद्याः शक्तयः विद्यन्ते। परन्तु तस्य उपर्युक्तशक्तिविषयकं ज्ञानं न भवति। एतासां शक्तीनां प्रत्ययः विकासश्च शिक्षाद्वारा एव भवितुमर्हति। एतासां पूर्णविकासे मानवानां पूर्णतायाः अभिव्यक्तिः भवति, अभिव्यक्त्या च मनुष्यनिर्माणं भवतीति। तादृशः मनुष्यः जीवनसङ्घर्षणेन साकं योद्धुं समर्थो भूत्वा जयं प्राप्नोति।

अतः स्वामिपादाः केवलं सूचनात्मकं ज्ञानं तथ्यात्मकज्ञानं वा शिक्षा इति न मन्वते स्म। स्वामिपादाः वदन्ति – "शिक्षा नाम न केवलं ज्ञानस्य परिचयसमुच्चयः अथव विषयसङ्ग्रहो वा, येनाऽस्माकं मस्तिष्कं पूर्णं भवति। किन्तु आजीवनपठनेनापि जीवनमार्गप्रदर्शनं न भवति। अपि तु तेन सह तेषां भावानां विचाराणां च आत्मसात्करणीयं भवति, यैः विचारैः अस्माकं जीवननिर्माणं भवति, मनुष्यत्वस्य निर्माणं भवति, चरित्रस्य निर्माणं भवति। यदि शिक्षा केवलं विषयसङ्ग्रहणमात्रं चेत् पुस्तकालयः सर्वेभ्यः महान् ज्ञानवान् स्यात्, ऋषिः अपि भवितुमर्हति।[5]"

**स्वामिविवेकानन्दस्य शिक्षायाः उद्देश्यानि–**

मनुष्यान्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षायाः उद्देश्यं भवितुमर्हति। यद्यपि पूर्णता स्वाभाविकरूपेण सर्वेषु मनुष्येषु विद्यते तथापि शिक्षाद्वारा अस्याः अभिव्यक्तिर्भवति, शिक्षया अस्याः पूर्णतायाः उपरि यदावरणं वर्तते तस्य अनावरणमात्रं करणीयम्। अपूर्णस्य पूरणं बाह्यायासेन नैव भवति। अतः एतदपूर्णतायाः पूरणं शिक्षायाः उद्देश्यं भवितुमर्हति। एतस्य उद्देश्यस्य पूर्णता निम्नैः अङ्गैः भवति। तद्यथा –

**(१) शारीरकपूर्णता** – पूर्णताप्रास्यै प्रथमलक्ष्यं ध्येयं वा वर्तते शारीरिकस्वास्थ्यम्। शारीरिकदुर्बलता अस्माकं पूर्णताम् अत्यन्तं बाधते इति स्वामिपादानामाशयः। अतः स्वामिपादाः वदन्ति – प्रथमतः अस्माकं युवकाः सबलाः

[4] Complete Works of Swami Vivekananda, Vol 1
[5] Complete Works of Swami Vivekananda, Vol 1, Page 411





भवेयुः। धर्मः अनन्तरविषयः भवति। यदि शरीरस्वास्थ्यं सम्यग् भवति चेत् भवान् गीतापाठनापेक्षया पादकन्दुकक्रीडनेन स्वर्गनैकट्यं प्राप्तुं शक्नोति।

**(२) जीवनसङ्घर्षणार्थं सन्नद्धता** – स्वामिविवेकानन्दमतानुसारं शिक्षायाः द्वितीयं लक्ष्यमस्ति बालकानां जीवनसङ्घर्षणार्थं सन्नद्धता। जीवननिर्माणार्थं साङ्केतिकी एवं वैज्ञानिकी शिक्षा आवश्यकी। अतः जीवनसङ्घर्षनिर्माणान्तर्गतरूपेण आजीविकाशिक्षायाः अपि समावेशो भवति। तत्कालीनशिक्षा मनुष्ये केवलं बाह्यपरिवर्तनम् उत्पादयति। परन्तु मनुष्यस्य आजीविकोपार्जनकरणे अशक्ता भवति। जीवनसङ्घर्षसन्नाहस्य प्रतिफलं उत्पादनरूपेण प्रस्फुटितं भवितव्यम्।

**(३) राष्ट्रियभावनायाः अन्ताराष्ट्रियभावनायाश्च विकासः** – स्वामिपादाः राष्ट्रियता-अन्ताराष्ट्रियतयोर्मध्ये विरोधाभासं न पश्यन्ति। अपि च स्वामिपादैः वेदान्तस्य यद् आधुनिकं व्याख्यानं कृतं तत्रापि तैः पौनः पुन्येन एतदेव उक्तमस्ति यत् सम्पूर्णमानवतायां एकत्वं विद्यते। परन्तु अस्य विकासः क्रमशः भवति। अतः शिक्षाद्वारा राष्ट्रियभावनायाः राष्ट्रियगौरवस्य च विकासः भवेत् एतदपि शिक्षायाः एकं लक्ष्यमस्ति। एतद्विषये स्वामिपादाः एकस्मिन् भाषणे उक्तवन्तः यत् " हे वीर! साहसस्य अवलम्बनं कुरु। गर्वेण वदतु अहं भारतीयोऽस्मि। सर्वे भारतीयाः मे भ्रातरः। भवान् उच्चैः वदतु यत् मूर्खभारतीयः, ब्राह्मणभारतीयः, चाण्डालभारतीयः सर्वे मम भ्रातरः सन्ति।"

**(४) चरित्रविकासः** – नैतिकचरित्रस्य विकासः शिक्षायाः चतुर्थं लक्ष्यं भवितुमर्हतीति स्वामिपादाः कथयन्ति। स्वामिपादाः वदन्ति – "अद्यतनकाले चरित्रवतोः स्त्रीपुरुषयोः आवश्यकता वर्तते। यस्य कस्यापि राष्ट्रस्य विकासः तस्य सुरक्षा अधिकतया चरित्रवतां नागरिकाणामुपरि निर्भरं भवति। यदि वयं भाविनागरिकाणां कृते शिक्षां दद्मः चेत् तत् सुदृढतया चरित्रनिर्माणमित्याधारेण स्यात्। अन्यथा चरित्रनाशात् सर्वमपि नष्टं भवति।

स्वामिपादेन न केवलं शिक्षाविषयकविचाराः उद्देश्यानि वा प्रकटितानि अपि तु तेषां शिक्षणोद्देश्यानां प्राप्त्यर्थं कः शिक्षणविधिः स्यात् इत्यपि स्वकीयेषु भाषणेषु भूयो भूयः उक्तम्। स्वामिविवेकानन्दमतानुसारं ज्ञानप्राप्तेः एकमात्रं विधिरस्ति – एकाग्रता। यावती एकाग्रतायाः शक्तिः भवति तावदधिकं ज्ञानं प्राप्तुं शक्यते। यदि कश्चित् पादुकापरिष्कारकर्तापि (shoe polisher) एकाग्रताकारणेण स्वकार्यं सम्यक् कर्तुं प्रभवति। एवं पाचकोऽपि एकाग्रताकारणादेव स्वादु पाकं कर्तुं शक्नोति। अतः एकाग्रताद्वारा मानवस्य आन्तरिकी शक्तिः अत्यन्तप्रबला भवति। एकत्र स्वामिपादाः

लिखन्ति "शिक्षायाः मूल्यं तथ्यानां सङ्ग्रहो न, किन्तु एकाग्रता इति। यदि पुनः मया शिक्षा प्राप्तव्या भवति चेत् एकाग्रता-अनासक्तिरूपशक्तिद्वयस्य विकासद्वारा एवं मनोरूपस्य निर्दोषयन्त्रस्य साहाय्येन इच्छामात्रात् तथ्यानां सङ्कलनं कर्तुं शक्नोमि।"

एवञ्च स्वामिपादेन वास्तवरूपेण वेदान्तविज्ञानयोः समन्वयं कृत्वा शिक्षाविषयकविचाराः प्रकटिता, ये च सार्वभौमरूपेण विद्योतन्ते। स्वामिविवेकानन्दस्य जीवनं, सन्देशः, शिक्षाविषयविचाराश्च अतिप्राचीनम् भारतराष्ट्रमिदं समसामयिकप्रपञ्चानुरूपं रूपान्तरयित्वा स्वमूलेषु पुनः संस्थापितवन्तः। शिक्षाविषयविचाराः सर्वदा प्रेरकाः भवन्ति।